## अतेः शुनः। (९६/७९८)

अतिशब्दात् परः यः श्वन्शब्दः तदन्तात् तत्पुरुषात् टच् प्रत्ययो भवति[1]। अतिक्रान्तः श्वानम् अतिश्वो वराहः। [2]जववान् इत्यर्थः। अतिश्वः सेवकः। [3]सुष्ठु स्वामिभक्तः इत्यर्थः। [4]अतिश्वी सेवा। अतिनीचा इत्यर्थः॥

## उपमानादप्राणिषु। (९७/७९९)

उपमानवाची यः [5]श्वन्शब्दोऽप्राणिषु वर्तते तदन्तात् तत्पुरुषात् टच् प्रत्ययो भवति[6]। आकर्षः श्वेव आकर्षश्वः। [7]फलकश्वः। उपमितं व्याघ्रादिभिः (२.१.५६/७३५) इति समासः। उपमानात् इति किम्? न श्वा अश्वा लोष्टः। अप्राणिषु इति किम्? वानरः श्वेव वानरश्वा॥

## उत्तरमृगपूर्वाच्च सक्थ्नः। (९८/८००)

उत्तर मृग पूर्व इत्येतेभ्यः परो यः सक्थिशब्दः, चकारादुपमानं च, तदन्तात् तत्पुरुषाट् टच् प्रत्ययो भवति [8]समासान्तः। उत्तरसक्थम्। मृगसक्थम्। पूर्वसक्थम्। उपमानात् खल्वपि – फलकमिव सक्थि फलकसक्थम्॥

## नावो द्विगोः। (९९/८०१)

नौशब्दान्तात् [9]द्विगोः टच् प्रत्ययो भवति [10]समासान्तः। द्वे नावौ समाहृते द्विनावम्। त्रिनावम्। द्विनावधनः[11]। पञ्चनावप्रियः। द्वाभ्यां नौभ्यामागतं द्विनावरूप्यम्। द्विनावमयम्[12]। द्विगोः इति किम्? राजनौः। अतद्धितलुकि इत्येव, पञ्चभिर्नौभिः क्रीतः पञ्चनौः। दशनौः॥

## अर्धाच्च। (१००/८०२)

अर्धशब्दात् परो यो नौशब्दः तदन्तात् तत्पुरुषाट् टच् प्रत्ययो भवति[13]। अर्धं नावः अर्धनावम्। 'अर्धं नपुंसकम्' (२.२.२/७१३) इति समासः। परवल्लिङ्गं न भवति, लोकाश्रयत्वात् लिङ्गस्य[14]॥

## खार्याः प्राचाम्। (१०१/८०३)

द्विगोः, अर्धाच्च इति द्वयमप्यनुवर्तते। खारीशब्दान्तात् द्विगोरर्धाच्च परो यः खारीशब्दः तदन्तात् तत्पुरुषाट् टच् प्रत्ययो भवति[15] प्राचामाचार्याणां मतेन। द्वे खार्यौ समाहृते द्विखारम्, द्विखारि। [16]त्रिखारम्, त्रिखारि। अर्धं खार्याः अर्धखारम्, अर्धखारि॥

---

1. समासान्तः इत्यधिकम् ब.ग.फ. 2. जवनः ब.ड. 3. अतिस्वामिभक्तः क. 4. अतिश्वा क. 5. समासान्तः श्वशब्दः ग. 6. समासान्तः इत्यधिकम् ब.क.ग. 7. फलकः श्वा इव इत्यधिकम् ग. 8. समासान्तः नास्ति फ.ह. 9. तत्पुरुषात् क. 10. समासान्तः नास्ति फ. 11. त्रिनावधनः इत्यधिकम् ब.ड.फ. 12. त्रिनावरूप्यम् त्रिनावमयम् इत्यधिकम् फ, क्लीबत्वं लोकात् इत्यधिकम् फ. ग 13. समासान्तः इत्यधिकम् ड. ग. फ. 14. इति इत्यधिकम् क. 16. समासान्तः इत्यधिकम् ब.ग.फ. 15. त्रिखारम् नास्ति फ.